श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री करुणाकराचार्येण विरचितम्

# ॥ श्रीनङ्गैनल्लूर् हयग्रीवमङ्गलम् ॥

*This document** has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीनङ्गैनल्लूर् हयग्रीवमङ्गलम् ॥

रमणीसत्पुरे वासं तन्वते स्फटिकाद्रये।
चन्द्रबिम्बस्थितायास्तु हयग्रीवाय मङ्गलम्॥ १ ॥

हेषामिषमहाघोष वेदशास्त्रविहारिणे।
ओषधीशाधिवासाय हयग्रीवाय मङ्गलम्॥ २ ॥

श्वेतद्वीपं परं व्योम त्यक्त्वा भूमौ विहारिणे।
मांसनेत्रैश्च सेव्याय हयग्रीवाय मङ्गलम्॥ ३ ॥

अङ्के लक्ष्मीं दधानाय तुङ्गमङ्गलमूर्तये।
नङ्गैनल्लूर्पुरीशाय हयग्रीवाय मङ्गलम्॥ ४ ॥

वेधसे चतुरो वेदान् योऽददात् करुणामयः।
आहृत्य चासुरेभ्यस्तान् हयग्रीवाय मङ्गलम्॥ ५ ॥

अस्मदाचार्यपर्यन्त गुरूणां वदने स्थिते।
वेदमार्गाभिगोप्त्रेऽस्तु हयग्रीवाय मङ्गलम्॥ ६ ॥

भाषासेवितपादाय व्यासादिऋषिभिस्सदा।
सन्नुताय सतां गोप्त्रे हयग्रीवाय मङ्गलम्॥ ७ ॥

हव्यकव्यभुजे नित्यं मधुकैटभमर्दिने।
कलानिधिनिवासाय हयग्रीवाय मङ्गलम्॥ ८ ॥

वेदान्तदेशिकं नाम्ना निजबिम्बं च दक्षिणे।
दधते पार्श्वतस्तस्मै हयग्रीवाय मङ्गलम्॥ ९ ॥

वेदवेदान्तशास्त्राणां प्रसुवे जीवबुद्धये।
रमणीसत्पुरस्थाय हयग्रीवाय मङ्गलम्॥ १० ॥

www.prapatti.com

कविश्रीनिधिपुत्रेण करुणाकरसञ्ज्ञया।
युतेन विनुतायास्तु हयग्रीवाय मङ्गलम्॥ ११ ॥

॥ इति श्रीनङ्गैनल्लूर् हयग्रीवमङ्गलं संपूर्णम् ॥

www.prapatti.com